श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

शङ्कराचार्य स्वामिश्रीमहेश्वरानन्दसरस्वतीविरचितम्

# ॥ श्री सङ्कष्टमोचनस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री सङ्कष्टमोचनस्तोत्रम् ॥

सिन्दूरपूररुचिरो बलवीर्यसिन्धुः
बुद्धिप्रवाहनिधिरद्भुतवैभवश्रीः।
दीनार्तिदावदहनो वरदो वरेण्यः
सङ्कष्टमोचनविभुस्तनुतां शुभं नः॥ 1 ॥

सोत्साहलङ्घितमहार्णवपौरुषश्रीः
लङ्कापुरीप्रदहनप्रथितप्रभावः।
घोराहवप्रमथितारिचमूप्रवीरः
प्राभञ्जनिर्जयति मर्कटसार्वभौमः॥ 2 ॥

द्रोणाचलानयनवर्णितभव्यभूतिः
श्रीरामलक्ष्मणसहायकचक्रवर्ती।
काशीस्थदक्षिणविराजितसौधमल्लः
श्रीमारुतिर्विजयते भगवान् महेशः॥ 3 ॥

नूनं स्मृतोऽपि दयते भजतां कपीन्द्रः
सम्पूजितो दिशति वाञ्छितसिद्धिवृद्धिम्।
सम्मोदकप्रिय उपैति परं प्रहर्षं
रामायणश्रवणतः पठतां शरण्यः॥ 4 ॥

श्रीभारतप्रवरयुद्धरथोद्धतश्रीः
पार्थैककेतनकरालविशालमूर्तिः।

उच्चैर्घनाघनघटाविकटाट्टहासः
    श्रीकृष्णपक्षभरणः शरणं ममास्तु ॥ **5** ॥

जङ्घालजङ्घ उपमातिविदूरवेगो
    मुष्टिप्रहारपरिमूर्च्छितराक्षसेन्द्रः।
श्रीरामकीर्तितपराक्रमणोद्भवश्रीः
    प्राकम्पनिर्विभुरुदञ्चतु भूतये नः ॥ **6** ॥

सीतार्तिदारुणपटुः प्रबलः प्रतापी
    श्रीराघवेन्द्रपरिरम्भवरप्रसादः।
वर्णीश्वरः सविधिशिक्षितकालनेमिः
    पञ्चाननोऽपनयतां विपदोऽधिदेशम् ॥ **7** ॥

उद्यद्भानुसहस्रसन्निभतनुः पीताम्बरालङ्कृतः
    प्रोज्ज्वालानलदीप्यमाननयनो निष्पिष्ट रक्षोगणः।
संवर्तोद्यतवारिदोद्धतरवः प्रोच्चैर्गदाविभ्रमः
    श्रीमान् मारुतनंदनः प्रतिदिनं ध्येयो विपद्भञ्जनः ॥ **8** ॥

रक्षः पिशाचभयनाशनमामयाधि -
    प्रोच्चैर्ज्वरापहरणं दमनं रिपूणाम्।
सम्पत्तिपुत्रकरणं विजयप्रदानं
    सङ्कष्टमोचनविभोः स्तवनं नराणाम् ॥ **9** ॥

दारिद्र्यदुःखदहनं शमनं विवादे
    कल्याणसाधनममङ्गलवारणं च।
दाम्पत्यदीर्घसुखसर्वमनोरथाप्तिं
    श्रीमारुतेः स्तवशतावृतिरातनोति ॥ **10** ॥

स्तोत्रं य एतदनुवासरमाप्तकामः
    श्रीमारुतिं समनुचिन्त्य पठेत् सुधीरः।
तस्मै प्रसादसुमुखो वरवानरेन्द्रः
    साक्षात्कृतो भवति शाश्वतिकः सहायः॥ **11** ॥

सङ्कष्टमोचनस्तोत्रं शङ्कराचार्यभिक्षुणा।
महेश्वरेण रचितं मारुतेश्चरणेऽर्पितम्॥ **12** ॥

॥ श्री सङ्कष्टमोचनस्तोत्रं समाप्तम्॥